# Rishikashyapaproktam Shivapanchaksharatattvopadesham

# ઋષિકશ્યપપ્રોક્તં શિવપઞ્ચાક્ષરતત્ત્વોપદેશમ્

## Document Information

Text title : Rishikashyapaproktam Shivapanchaksharatattvopadesham

File name : RRiShikashyapaproktaMshivapanchAkSharatattvopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 7 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં શિવપઞ્ચાક્ષરતત્ત્વોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

કશ્યપઃ (ઉવાચ)

વિદ્યાં હૃદ્યાં દદામ્યેવ તવ પઞ્ચાક્ષરાત્મિકામ્ ।
પઞ્ચાક્ષરપરોમર્ત્યઃ શિવજ્ઞાનાય કલ્પતે ॥ ૧૪॥

તેન મુક્તો ભવત્યેવ વિદ્યયા દ્યોતતેઽણ્ડજ ।
પિતેવોપદિશેન્મન્ત્રં ગાયત્ર્યાઃ સમમેવ હિ ॥ ૧૫॥

ગાયન્તં ત્રાયતે યસ્માત્ ગાયત્રી ભર્ગચિહ્નિતા ।
સંસારભર્જકો ભર્ગઃ શિવ એવેતિ નિશ્ચિનુ ॥ ૧૬॥

પઞ્ચાક્ષરં ચ ગાયત્રી શ્રૌતમન્ત્રદ્વયં સ્મૃતમ્ ।
ઉભયોર્દૈવતં યસ્માત્ મહાદેવો મહેશ્વરઃ ॥ ૧૭॥

ગાયત્રીવત્સદા જપ્યો મન્ત્રરાજોઽયમુત્તમઃ ।
તસ્માત્તવોપદેક્ષ્યામિ મન્ત્રં પઞ્ચાક્ષરં પરમ્ ॥ ૨૦॥

મન્ત્રેણાનેન દેવેશં યઃ પૂજયતિ શઙ્કરમ્ ।
સર્વપાપવિમુક્તશ્ચ જાયતે નાત્ર સંશયઃ ॥ ૨૧॥

પઞ્ચાક્ષરં સતારં યઃ પ્રજપેત્પ્રીતિપૂર્વકમ્ ।
સ તુ મુક્તો ભવત્યેવ ષડક્ષરસમાશ્રયાત્ ॥ ૨૨॥

પઞ્ચાસ્યધ્યાનનિરતઃ પઞ્ચાક્ષરજપાદરઃ ।
મહાપાપયુતો વાપિ યુક્તો વાપ્યુપપાતકૈઃ ॥ ૨૩॥

વિમુચ્યતે સદ્ય એવ રાહુમુક્ત ઇવોડુરાટ્ ।
ન ગાયત્ર્યાઃ પરો મન્ત્રો ન ચ પઞ્ચાક્ષરાન્મનુઃ ॥ ૨૪॥

દ્વિજત્વેનૈવ સા પ્રોક્તા ગાયત્રી ભર્ગદેવતા ।
શિવપ્રસાદસિધ્યર્થં શ્રીમત્પઞ્ચાક્ષરો મનુઃ ॥ ૨૫॥

ગાત્ર્યામેવ ગાયત્રી ભર્ગશબ્દે શિવાત્મકે ।
શિવઃ પઞ્ચાક્ષરાકારઃ પઞ્ચવર્ણાઃ શિવસ્ય ખે ॥ ૩૦॥

વર્ણપઞ્ચાક્ષરસ્યાસ્ય પઞ્ચાસ્યક્રમતઃ શિવે ।
લીયન્તે કિલ કલ્પાન્તે પ્રણવો હૃદયે શિવે ॥ ૩૧॥

તસ્માચ્છ્રુતિષુ સર્વત્ર શિવો ગીતઃ સદાશિવોમ્ ।
ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતકૃત્ ॥ ૩૨॥

બ્રહ્મૈવ સર્વદા શમ્ભુઃ બ્રહ્મણોઽધિપતિઃ શિવઃ ।
નકારશ્ચ લયં યાતિ સદ્યોજાતાસ્યકે શિવે ॥ ૩૩॥

મકારોઽપિ લયં યાતિ વામદેવાસ્યકે શિવે ।
શિકારોઽપિ હિ લીયેત અઘોરાસ્યે મહેશ્વરે ॥ ૩૪॥

વકારોઽપિ ચ લીયેત શિવે તત્પુરુષાત્મકે ।
યકારોઽપિ ચ લીયેત સર્વાઙ્ગેઽપિ ચ શઙ્કરે ॥ ૩૫॥

એવમેવ મહામન્ત્રમવિમુક્તે વિશેષતઃ ।
સતારસ્તારકો મન્ત્રઃ શૈવેભ્ય ઉપદિશ્યતે ॥ ૩૬॥

સ ન જીવેભ્ય એવૈશ ઈશાનેન દયાલુના ।
નાતઃ પરતરો મન્ત્રસ્તારકઃ પારમૈશ્વરઃ ॥ ૩૭॥

યસ્માદુચ્ચાર્યમાણેન શિવરૂપં વિભાસતે ।
શિવસ્વરૂપભાવેન સ તુ સાક્ષાચ્છિવો ભવેત્ ॥ ૩૮॥

વર્ણેભ્યોઽપિ પરં સારં તારં શિવમયં વિદુઃ ।
અવિદ્યાકર્મપાશેભ્યસ્તારણાત્તારમેવ હિ ॥ ૩૯॥

વર્ણાસ્ત્વન્યે તુ સગુણા નિર્ગુણં તારમેવ હિ ।
સતારં વર્ણસહિતં શિવરૂપાવભાસકમ્ ।
સંશીલયન્ પરં યાતિ શિવમેવ હિ નિર્ગુણમ્ ॥ ૪૦॥

ગાયત્રીમન્ત્રસારં દ્વિજકુલતિલકાકાર સિદ્ધત્વદાયિ
મન્ત્રોઽયં શિવતોષકૃત્ સુવિહિતો વેદાન્તભાગેષ્વપિ ।
તારોઽયં પરનિગુણપ્રવટને શબ્દાદિરેવૈષ વૈ-
ભિક્ષૂણામથ શામ્ભવાત્મકહૃદા સંશીલિતો મુક્તિદઃ ॥ ૪૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં શિવપઞ્ચાક્ષરતત્ત્વોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૭ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 7 . vAvRRittashlokAH ..

Notes:
Ṛṣi Kaśyapa ઋષિ કશ્યપ delivers Upadeśa ઉપદેશ (to Pataṅga પતઙ્ગ) about the Essence i.e. Tattva of ŚivaPañcākṣhara શિવપઞ્ચાક્ષરતત્ત્વ, whereby he introduces the mapping of the five faces (functional aspects) of Śiva શિવ to the five syllables of the ŚivaPañcākṣharaMantra શિવપઞ્ચાક્ષર મન્ત્ર i.e. Namaḥ Śivāya નમઃ શિવાય as follows:
Na ન : Sadyojāta સદ્યોજાત
Ma મ : Vāmadeva વામદેવ
Śi શિ : Aghora અઘોર
Va વ : Tatpuruṣa તત્પુરુષ
Ya ય : Sarvāṅga સર્વાઙ્ગ
He elaborates that in the Śruti-s શ્રુતિઃ, Śiva શિવ is bespoken as ŚadāŚiva સદાશિવ; as Īśāna ઈશાન, He is the Lord of All Knowledge and Beings; Brahma બ્રહ્મ is indeed Śambhu શમ્ભુ and Śiva શિવ is Brahmaṇo'dhipati બ્રહ્મણોઽધિપતિ.
Ṛṣi Kaśyapa ઋષિ કશ્યપ also explains about Gāyatrī Mantra ગાયત્રી મન્ત્ર that includes the word Bhargaḥ ભર્ગઃ, which indeed is a (manifest) "form" of Śiva શિવ; and that Mahādeva Maheśvara મહાદેવ મહેશ્વર is the Devatā દેવતા of both ŚivaPañcākṣhara શિવપઞ્ચાક્ષર and Gāyatrī ગાયત્રી.
When ŚivaPañcākṣhara શિવપઞ્ચાક્ષર (that is the Mahāmantra મહામન્ત્ર for the unliberated), is recited with Tāra તાર i.e. Om̐ ઓં, is known as the ŚivaṢaḍakṣaraMantra શિવષડક્ષરમન્ત્ર i.e. Om̐ Namaḥ Śivāya ઓં નમઃ શિવાય. While Tāra તાર i.e. Om̐ ઓં is Nirguṇa નિર્ગુણ, the Pañcavarṇa પઞ્ચવર્ણ are Saguṇa સગુણ; and, the combination of these Reflect ŚivaRūpa શિવરૂપ; and one who meditates upon that, experiences the (State of) Nirguṇa Śiva નિર્ગુણ શિવ.

Proofread by Ruma Dewan

*Rishikashyapaproktam Shivapanchaksharatattvopadesham*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*